केरळविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः — २०८

अम्बिकालापः ।

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।

१९६३/११३९

मूल्यं रूप्यकमेकम्

INTRODUCTION

The *AMBIKĀLĀPA* or Umālāpa as it is otherwise called[1] is a fine lyric poem composed in the metre Mandākrāntā. The work appeared originally in Vol. XII, No. 3 of the Journal of the Kerala University Oriental Manuscripts Library.

Ambikālāpa deals with the story of the wedding of Śiva with Pārvatī. The work is divided into the Pūrva and Uttara ālāpas consisting of 70 and 63 verses respectively. The poem begins with the arrival of Pārvatī along with her companions [sakhīs] to a valley of the Himalayas close to the river Ganges. They see Śiva there, engrossed in deep penance under a Devadāru tree. Pārvatī who had already fallen in love with Śiva makes her obeisance to him. Just then, Kāmadeva who was waiting for such an opportunity shoots his flower-arrows at Śiva. After a moment's loss of his presence of mind Śiva reduces Kāmadeva to ashes by the fire of his wrath, and all on a sudden departs from the spot. Pārvatī, desparate at this turn of events, commences a rigorous penance to please Lord Śiva. After many a day of such excruciating penance, Śiva one day appears before

---

1. *In the second verse it is called Ambikālāpa* (गुणैरम्बिकालापरूपा) *while the concluding verse refers to it as Umālāpa* (अलिखदुमालापं).

Pārvatī in the guise of a brahmacārin and admonishes her for the folly of loving Śiva. Pārvatī chastises him for speaking so ill of Śiva and along with her sakhīs prepares to take leave of him. Śiva appears in his real form and blesses her. Subsequently their marriage is celebrated with great pomp and splendour.

It can be seen from this outline of the story of the Ambikālāpa that it closely follows the story as described in the Kumārasaṁbhava. Occasionally however, the author introduces certain episodes not found in Kalidasa's work. The fashioning of a statue of Śiva by the sakhīs of Pārvatī may be given as an instance.[2]

We have no information at present who the author of the work is nor on its date of composition. In a verse found at the end of the work[3] it is stated that one Parameśvara 'wrote' the poem. The use of the word '*alikhat*' and the fact that the verse is found apart from

---

2. *Pūrva, Verses. 60 and 61.*

3. *P. 28, last verse. The description of Brahmakhala contained in this verse* (ब्रह्मखलाख्यमीप्सिततरं कैलासतश्शूलिनः) *is amazingly similar in idea to a verse in the Mayūrasandeśa of Udaya Rāja (Poona, 1944)*

कैलासाद्रेरपि भगवतः प्रेमपात्रं पवित्रं
ब्रह्मक्षेत्रं भुवनविदितं क्षेत्रमर्धेन्दुमौलेः

which also describes the same temple of Brahmakṣetra (khala). Udaya Rāja is supposed to have lived in the first half of 16th century. See Ullur S. P. Iyer, Kerala sahitya charitram, Vol II, p. 70. and Dr. Kunjunni Raja, Contribution of Kerala to Sanskrit Literature. p. 230.

the body of the work would indicate that it was composed by some scribe who copied the work. However, the amount of personal detail given in the verse makes us pause in the above assertion. It is difficult to believe in the first place, that an ordinary scribe would have composed such a fine verse and secondly, whether he would have given so much of information regarding himself. One would be justified, for the above reasons, in surmising that the verse is from the pen of the author himself.

From the details given in the verse we gather that this Parameśvara, be he the author himself or just a scribe, belonged to a house called Mukundamaṅgala in Brahmakhala.[4] A temple dedicated to Śiva is still to be found at Brahmakkaḷa (ब्रह्मखळ), a few miles to the south-east of the Guruvāyūr temple. Ullur S. Parameswara Iyer refers to a Nambūtiri family called Maṅgala situated not far from this temple at Brahmakkaḷa and with which, according to him, the family of Kākkaśśeri Bhaṭṭatiri had merged[5]. Parameśvara might have in all probability belonged to this family.

---

4. *Nārāyaṇa Paṇḍita, author of the Meya portion of Mānameyodaya, also refers to this Śiva temple at Brahmakhala in his commentaries on Raghuvaṁśa and Kumārasaṁbhava. Nārāyaṇa Paṇḍita is generally believed to have belonged to this place. See Dr. Kunjunni Raja, Contribution of Kerala to Sanskrit Literature. p. 104.*

5. *Keralasahityacharitram, Vol. II, pp. 55 - 56.*

Ambikālāpa bears a striking resemblance in form to the Gopikonmāda,[6] another anonymous work composed in the Mandākrāntā metre. The Gopikonmāda, dealing with the story of the love of a Gopī for Śrīkṛṣṇa is divided into two parts–the prathama and dvitīya unmādas Some of the verses of the Ambikālāpa are closely similar to verses in the Gopikonmāda. We may note a few verses from the Gopikonmāda and Ambikālāpa that are similar in style and idea.

व्यत्यस्ताङ्घ्रिं वलितवदनं वान्तवेणीकलापं
  लोलापाङ्गं ललितमुरलीकुग्मलीभावितोष्ठम् ।
वीतं पीताम्बरममलया मालया वैजयन्त्या
  बर्हापीडं प्रणयभरिता प्रैक्षतापादचूडम् ॥

[Gop. I,7.]

अर्धोन्मीलन्नयनकमलं बद्धपद्मासनस्थं
  मुग्धा शुद्धस्फटिकधवलं संनिरुद्धेन्द्रियाश्वम् ।
हस्ते मुद्रां हृदयकमले बोधमुद्रां दधानं
  ध्यानारूढं धनपतिसखं प्रैक्षतापादचूडम् ॥

[Amb. I,8.]

पादावेतौ स खलु शकटो जङ्घिकेयार्जुनौ तौ
  मध्योऽयं सा सुरभिरशना वक्ष एतद् वृषः सः ।
बाहुश्चायं स पुनरचलो वक्त्रमेतज्जगत् तद्
  बालस्सोऽयं स तु विषधरः सत्यभूद् विस्मितान्तः ॥

[Gop. I,8.]

पादावेतौ स खलु भुवनश्लाघ्यभूमा वरोऽरं
  मौलिः सोऽय स च कमलभूः शुक्लहंसेन्द्रनीलः ।

6. *T. S. S. No. 180.*

एतौ पादौ स च फणिपतिज्यानताङ्गः सुमेरुः
कण्ठः सोऽयं शिव शिव ! जगद्धस्मरं कालकूटम् ॥

[Amb. I,9.]

तत्तारुण्यं तदपि तरलं वीक्षितं तान् विलासां-
स्तान् सल्लापांस्तदपि हसितं तद्वपुस्ताञ्च गोष्ठीम् ।
तान् वा भावांस्तदपि च गतं तां च लावण्यवीचीं
प्रेक्षिष्येऽहं पुनरपि कदा देवतानां प्रसादात् ॥

[Gop,II,17]

तल्लावण्यं तदपि च वपुः सैव धीरासिकेयं
तान्येवैतान्युपरतपरिस्पन्दनानीक्षणानि ।
मुद्राप्येका करकिसलये लक्ष्यते सैव भद्रा
मन्त्राभ्यासैर्मधुरमधरस्पन्दनं क्व प्रयातम् ॥

[Amb,I,63]

These verses, so alike in their style of composition, make us wonder whether these two poems were written by the same author of whom we know so little at present. There are as well many a similar usage in these poems.

Whoever the author of Ambikālāpa might have been, it is certain that he was one of great literary accomplishment. The spontaneity of expression and the melody of diction to which almost every verse in the Ambikālāpa would serve as illustration, puts him in a class far above the ordinary poetasters. At times our author borrows an idea from Kālidāsa, but in his hands it undergoes such a metamorphosis that we rarely feel it second-hand.

The following verse may serve as an illustration:

स्तोत्रप्रीतं तदनु सुतनुर्देवमालिङ्गनोत्कं
स्वामिन् दाता हिमगिरिरिति व्याहरन्ती विहाय ।
प्रेक्ष्य प्रेक्ष्य प्रियमनुपदं मन्दिरं गन्तुकामा
मुग्धा मार्गं मृदुलगमना दीर्घदीर्घं चकार ॥

[Uttara,44]

It would be interesting to compare the above verse with Kālidāsa's,

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥

[KS,V,85]

We are in no position at present to determine the date of the composition of the work.

The present edition is based on a manuscript in this Library (No. 5105 B) that originally belonged to one Rāghava Piṣāroṭy Govinda Piṣāroṭy, Kailāsapurath Piṣārom, Katuthuruthy, Kerala. It is written in Malayalam characters and is fairly intact but for the edges of a few leaves that are found worm-eaten. Apart from Ambikālāpa, the codex also contains a work called Saṁkṣeparāmāyaṇa.

I thank Sri. A. Ramachandra Sastri, Research Officer and Assistant Research Officers Sri. M. Madhavan Unni and Sri. C. P. M. Namboodiri who helped me in bringing out this work.

Trivandrum
11 - 7 - 1963

K. Raghavan Pillai
Curator

॥ श्री ॥

॥ अम्बिकालापः ॥

[पूर्वालापः]

अङ्कारूढामभिनवपरिष्वङ्गरोमाञ्चिताङ्गी-
मर्धाङ्गाङ्गप्रसरणसमुच्छृङ्खलानङ्गलीलाम् ।
सल्लापाय श्रवणहृदयां ह्लादयन् शैलकन्या-
मुल्लासं मे दिशतु मनसो बालशीतांशुमौलिः ॥ १ ॥

भक्तिश्रद्धाद्यतिशयवती पार्वतीशूलपाण्यो-
र्वाणी क्षोणीं वशय(त?तु) गुणैरम्बिकालापरूपा ।
शृण्वन्तस्तां श्रुतिपुटसुधासारभृङ्गारपूरां
सन्तुष्टान्तःकरणहरिणः (?) सन्तु सन्तो नितान्तम् ॥ २ ॥

प्राप्ता गौरी पितुरुपवनं प्रेयसीभ्यां विहर्तुं
भागीरथ्यास्तटपरिसरे पूर्णभाग्योपलभ्यम् ।
देवं ध्यानस्तिमितनयनं देवदारोरुदारे
मूले मूलं सकलजगतामिन्दुमौलिं ददर्श ॥ ३ ॥

चित्रं मेरुः स्फुरति पुरतः पार्श्वयोः पारिजातैः
पूर्णश्चन्द्रस्तदुपरि पुनः पङ्कजैरर्धफुल्लैः ।
तस्याप्युच्चैरधिकविलसन्मल्लिमालामृणालाः
सन्ध्यामेघावलिरिति मुदा सस्मितं सुस्थिताभूत् ॥ ४ ॥

लक्ष्मीभू(ताऽतः) पुरुषवपुषा किं दृशः पूर्णच(न्द्राऽन्द्र)-
स्सर्वोऽप्येवं विपरिणमते तेजसां वा समूहः ।
सौन्दर्याणां सकलजगतामेष सारो वपुष्मान्
किं स्यादेतन्मह इति मुहुश्चिन्तयामास देवी ॥ ५ ॥

अत्यादित्यद्युतिरतिशरच्चन्द्रलावण्यलक्ष्मी-
रत्यद्रीन्द्रोन्नतिरतिहरिब्रह्मदिव्यानुभावः ।
कोऽयं देवः शिव इव पुरो वर्तते किं शिवः स्या-
दित्याशङ्कामकुरुत चिरं शङ्करं वीक्ष्य गौरी ॥ ६ ॥

फाले नेत्रं पृथुनि जघने व्याघ्रकृत्तिं च धत्ते
मौलौ गङ्गामपि शशिकलां कालिमानं च कण्ठे ।
अङ्कैरेतैरनितरसुरश्रेष्ठसंलक्षणीयै-
र्देवः साक्षाच्छिव इति चि(रंऽरान्नि)र्दधाराद्रिकन्या ॥ ७ ॥

अर्धोन्मीलन्नयनकमलं बद्धपद्मासनस्थं
मुग्धा शुद्धस्फटिकधवळं संनिरुद्धेन्द्रियाश्वम् ।
हस्ते भद्रां हृदयकमले बोधमुद्रां दधानं
ध्यानारूढं धनपतिसखं प्रैक्षतापादचूडम् ॥ ८ ॥

पादावेतौ स खलु भुवन(श्ला)घ्यभूमा वरोऽरं
मौलिः सोऽयं स च कमलभूः शुक्कहंसेन्द्रनीलः ।
एतौ पादौ स च फणिपतिज्यानताङ्गः सुमेरुः
कण्ठः सोऽयं शिव शिव! जगद्धस्मरं काळकूटम् (?) ॥ ९॥

कीदृग् भाग्यं परिणतमिदं किं च तप्तं तपस्तत्
किं तत् पुण्यं(सु?)कृतमिह महत् के च देवाः प्रसन्नाः ।
किंस्विद् ज्ञानं चिरमधिगतं कश्च योगोऽधिरूढो
यत् पश्यामस्त्रिभुवनगुरुं चक्षुषा चन्द्रचूडम् ॥ १० ॥

इत्यालक्ष्य प्रियमधिकयोत्कण्ठया प्रेक्षमाणा
सख्योरग्रे सपदि सुमुखी लज्जया वार्यमाणा ।
यातायातैर्ललितललितैरिङ्गितैर्द्योतयन्ती
बाला मन्दानिलविचलिता वल्लरीवोल्ललास ॥ ११ ॥

अङ्गच्छायाममृतलहरीसुन्दरामिन्दुमौले-
र्निष्पन्दाभ्यामनिशमवला लोचनाभ्यां पिबन्ती ।
स्तब्धैरङ्गैर्मरतकमयी सालभञ्जीव भान्ती
भद्रा रुद्रे निहितहृदया भावभेदं प्रपेदे ॥ १२ ॥

स्विन्ना सद्यः शिरसि धृतया गङ्गयेवास्य सिक्ता
चूडाचन्द्रद्युतिभिरिव सा चर्चिता पाण्डुराभूत् ।
व्रीळावेशान्मुखमनमयद् वन्दमानेव देवं
रोमाञ्चेन द्रुतमरमयत् कञ्चुकेनेव हस्तम् ॥ १३ ॥

भक्त्युद्रेकस्फुरितपुळकप्रेक्षणीयाङ्गलक्ष्म्या
प्रीत्युत्फुल्लैर्नयनकमलैः प्रेक्षयन्त्यौ पुरारिम् ।
सख्यौ देवं धनपतिसखं वन्दमाने नदूरात्
श्लाघ्यालापां प्रियसहचरीमेवमाचख्यतुस्ताम् ॥ १४ ॥

सत्यं भाग्यैः फलितमधुना साधु दृष्टं भवत्या
मन्दाक्षं ते व्यपनय शिवो नैव मन्दाक्षलक्ष्यः ।
एष स्वप्ने सुरमुनिगणैः सेव्यमानः समन्ताद्
देवः पाणिं जपसुललितं पीडयन् (दीवि) क्षितोऽभूत् ॥१५॥

भद्रे किञ्च स्मरतु भवती भारतीं नारदीयां
तातस्याग्रे त्वयि (कुलटिके?तु ललिते) क्रीडया सञ्चरन्त्याम् ।
एषा बाला त्रिभुवनगुरोरीश्वरस्यार्धमङ्गं
प्रेमोत्कर्षोच्छ्वसितमनसः प्राप्नुयादित्युदीर्णाम् ॥ १६ ॥

क्रीडालौल्यं तव खलु मुहुर्वर्त्तते बाल्यसारं
क्रीडाहेतोरुपवनमिदं साम्प्रतं च प्रविष्टा ।
क्रीडापात्रं पुनरभिनवं सन्निधत्ते पुरस्तात्
क्रीड स्वैरं सुचिरममुना कन्दुकैः किं फलं ते ॥ १७ ॥

सल्लापाश्च श्रवणमधुराः शीलिताः शारिकाभ्यो
बाले ! बालैरिह सह मृगैर्वीक्षितं शिक्षितं च ।
हंसस्त्रीभिर्वलितगतयोऽप्यञ्जसैवोपादिष्टाः
कालः सोऽयं तव कलयितुं नीलकण्ठस्य लास्यम् ॥ १८ ॥

गङ्गाभङ्गाभ्यधिकमधुरे कान्तिपूरप्रवाहे
कण्ठच्छाया कुवलयकुलस्पन्दलक्ष्मीं दधाति ।
पद्मव्यूहीभवति विततिः पाणिपादाक्षिभासा
पाथःक्रीडामिह परिचिनु प्रेयसीच्छानुरूपम् ॥ १९ ॥

मन्दाकिन्यप्यधिकललिता चन्द्रलेखा च मौलौ
सन्ध्यानृत्तभ्रमणसमये नित्यमान्दोलयेते ।
आलम्ब्यास्य प्रियसखि! जटावल्लिमागुच्छलम्बां
डोलालीलामभिलषसि चेत्तत्तयोः स्यास्तृतीया ॥ २० ॥

दाक्षायण्या पितृकृतहरद्रोहनिर्वापहेतो-
र्देहे त्यक्ते सति दयितया यस्त्वया विप्रयुक्तः ।
ध्वस्ते भूतैः ससुरनिकरे साध्वरे हन्त दक्षे
त्वत्संप्राप्तेर्ध्रुवमुपवने वर्ततेऽसौ (पुरारिः)॥ २१ ॥

वामं भूमौ करमुरुतरं स्थापयित्वा तदंसे
वक्त्रं क्षिप्त्वा प्रशिथिलजटालम्बिगङ्गेन्दुलेशम् ।
कक्ष्योन्नद्धे तदितरकरं दक्षजानौ प्रसार्य
त्र्यक्षश्चित्रे विलिखित इव प्रेक्ष्यते मीलिताक्षः ॥ २२ ॥

शोकाविष्टः किमुत भवतीं चिन्तयन् पूर्वपत्नीं
त्वामन्वेष्टुं किमुत करणैर्लोभितैर्विप्रयुक्तः ।
मूर्च्छामार्च्छत्तव तनुपरित्यागदुःखेन किं वा
योगेन त्वामुत मृगयते त्वं (नु) वेत्तास्य वृत्तम् ॥ २३ ॥

इत्थं सख्योः श्रुतिपुटसुधासूक्तिमाकर्ण्य गौरी
भक्तिव्याजान्मनसि निहितं भावभेदं निगूह्य ।
ईर्ष्यारूक्षभ्रुकुटिकुटिला तर्जयित्वा बभाषे
वक्रोक्तिर्वां प्रसरति कथं वन्दनीयेऽप्यधीशे ॥ २४ ॥

एष ह्यादिः सकलजगतामेष एवावसानं
यस्याद्यन्तौ परमपुरुषब्रह्मणोरप्यमे(यः? यौ) ।
ऐश्वर्याणामुदय(लययो)रीश्वरः शाश्वतोऽसा-
वित्याभाष्य प्रणतिमकरोदद्रिराजस्य कन्या ॥ २५ ॥

सेवां कुर्मश्चिरमिह विभोर्जन्मसाफल्यसिद्ध्यै
भागीरथ्यास्सपदि विजये सम्भराम्भांसि कुम्भे ।
पूजायोग्यां पुरविजयिनः फुल्लकल्हारपुष्पै-
र्मालां हृद्यां रचय चतुरे मानिनीत्येवमुक्त्वा ॥ २६ ॥

सद्यः फुल्लं स्वयमुपहृतं पुष्पभारं तरूणां
पाणिद्वन्द्वे प्रकृतिमृदुले सावधानं दधाना ।
कल्याणी सा कुशलशकुनैः सूचितेशप्रसादा
शम्भोः पूजासमयमुचितं प्रेक्षमाणा प्रतस्थे ॥ २७ ॥

रोमाञ्चानामनुभव सुखस्याङ्कुराणां कदम्बै-
र्नेत्रोत्पन्नैः क्षणविगलितानन्दबाष्पाभिषिक्तैः ।
अन्तर्द्रष्टुं सपदि जगतां सूचयन् यस्त्वमेयो
योगादासीदुपरतमना योगिहृद्यानुभावः ॥ २८ ॥

नन्दीशाद्यैः प्रमथपतिभिर्वन्द्यमाना भवानी
मन्दं मन्दं मरतकशिलाक्लृप्तसोपानरथ्याम् ।
रङ्गत्तुङ्गस्तनभरनमन्मध्यभागा सखेलं
बाला शुद्धस्फटिकरचितां वेदिकामारुरोह ॥ २९ ॥

सिद्धिं योगादिव समुदितां स्वानुभूत्या च भूत्या
शान्त्या दान्त्या सममिव निजां भक्तिमाजानसिद्धाम् ।
शक्तिं साक्षादिव तनुमतीं मायया विद्ययासौ
तां मालिन्या सह विजयया शैलकन्यामपश्यत् ॥ ३० ॥

लावण्यानां नवशशिकलां लास्यभूमिं कलानां
शृङ्गाराणाममृतसरितं शारिकां जल्पितानाम् ।
ऐश्वर्याणां विपणिपदवीमाकरं मङ्गलानां
देवः साक्षादमनुत शिवो वीक्ष्य दाक्षायणीं ताम् ॥ ३१ ॥

धम्मिल्लेभ्यो बहलविगलत्फुल्लकल्हारपुञ्जा
पीनोत्तुङ्गस्तनभरदराभुग्नभव्यावलग्ना ।
चित्तं प्रेम्णा विकसितमिव त्र्यम्बकस्याङ्घ्रिमूले
बाला पुष्पं स्वयमुपहृतं विक्षिपन्ती ववन्दे ॥ ३२ ॥

शम्भुः स्पृष्ट्वा शतदलरुचा पाणिना (दक्षिणेन)
नेत्रैः फुल्लैरिव कुवलयैर्मण्डयन् वीक्ष्य सौम्यैः ।
वाचा मन्दस्मितविशदया ज्योत्स्नयेवाभिषिञ्चन्
भर्तारं ते रुचिरमचिरात् प्राप्नुहीत्यन्वगृह्णात् ॥ ३३ ॥

नित्यं गौरी नियमकुसुमान्याहरन्ती वनान्ता-
दालिम्पन्ती भुवमनुदिनं वेदिकां मार्जयन्ती ।
आसिञ्चन्ती परिसरतरूनग्निमुद्दीपयन्ती
तच्छुश्रूषामकुरुत चिरं सादराभ्यां सखीभ्याम् ॥ ३४ ॥

काले तस्मिंस्त्रिदशनिकरैस्तारकेणाभिभूतै-
स्तस्याराति त्रिणयनभव स्वामिनं काङ्क्षमाणैः ।
शंभुं गौर्या सह घटयितुं प्रार्थितः पुष्पधन्वा
रत्या साकं पुरविजयिनः पृष्ठभागं प्रपेदे ॥ ३५ ॥

सुप्तं सिंहं निभृतमुदधिं निर्मदं वारणेन्द्रं
राहुग्रस्तं ग्रहपरिवृढं मेघमाटोपशून्यम् ।
भस्मच्छन्नं प्रळयदहनं तत्र सस्मार मारो
ध्यानारूढं त्रिपुरमथनं प्रेक्षमाणः प्रशान्तम् ॥ ३७ ॥

यावत् कामो धनुषि मधुरे षट्पदज्यावनम्रे
गन्धोदग्रं शरमवसरे प्रस्तुते सन्दधाति ।
तावद् गौरी परिसरवनादाहृतान् रुद्रपादे
पूजाव्याजात् सपदि शतशः प्राहिणोत् पुष्पबाणान् ॥

मुञ्चत्येकं शरमपि शनैः पेलवं पुष्पबाणे
सञ्चुक्षोभ प्रसभमखिलं सेश्वरं विश्वमेव ।
त्र्यक्षस्याक्ष्णस्तदनु भुवनक्षोभहेतुं दिदृक्षो-
र्निर्घातौघाभ्यधिकपरुषः पावको निष्पपात ॥ ३८ ॥

नेशः क्रोधी नियतकरुणो मन्मथो नापराधी
सा वा देवी न खलु विमुखी नैव देवा विरुद्धाः ।
फुल्लैः पुष्पैः पुरविजयिनं पूजयित्वा च (पूर्वं)
हा हा कष्टं हतविधिवशाद् भस्मशेषः स्मरोऽभूत् ॥ ३९ ॥

अप्यत्यन्तं निभृतमनसां योगिनां स्त्रीसकाशे
प्रत्यूहाणां भृशमुपरमो नैव भूयात् समाधेः ।
निस्सामान्याभ्यधिकमहिमा नूनमेवं विदित्वा
भस्मीभूते सति च मदने भूतनाथस्तिरोऽभूत् ॥ ४० ॥

मूर्च्छां प्राप्य प्रसभमनघा बोधिता प्रेयसीभ्यां
स्वामिन् भक्तप्रिय पशुपते ! क्वासि कारुण्यसिन्धो ! ।
नीलग्रीवं निखिलभुवनाह्लादिनद्धेन्दुलेखं
नेत्रानन्दं वपुरनुपमं दर्शयेति व्यरोदीत् ॥ ४१ ॥

पृथ्वीपाथःपवनदहनव्योमसोमात्मसूर्यान्
भावानन्तर्बहिरविचलस्थावरान् स्थूलसूक्ष्मान् ।
सर्वं साक्षाच्छिव इति मुहुः प्रेक्षमाणा चचक्षे
सारङ्गाक्षी सकलहृदयद्राविणीं तत्र वाणीम् ॥ ४२ ॥

अग्नीन् पञ्च स्वयमुपहरन्नाज्यहव्येन्धनाद्यैः
कामं पूर्णाहुतमपि पुनः कल्पयन्नेत्रवह्नेः ।
स्वैरं यातस्त्रिभुवनगुरुः कृत्यशेषे समाप्ते
कामास्त्राग्निष्विह खलु मया तप्यते पञ्चसूग्रम् ॥ ४३ ॥

होतुः शम्भोर्मयि हुतवहं पूर्वमुद्दीपयन्त्यां
शीर्षे बद्धः श्रममशमयस्त्वं कलाशेषमूर्तिः ।
सम्पूर्णः सन्नपि स खलु मे साम्प्रतं शीतरश्मे !
कल्पान्ताग्निर्भवसि विधिना किं मया तेऽपराद्धम् ॥

चूडाकोटित्रिदशतटिनीशीकराभ्युक्षिताना-
मामोदं मे दिशसि शनकैश्शेखरारग्वधानाम् ।
मान्योऽसि त्वं मलयपवन ! स्वागतं स्वस्ति तेऽस्तु
ब्रूयाः किञ्चित् स्मरति भगवान् मत्सपर्याविशेषान् ॥

मुद्रां भद्रां करकिसलये बोधरूपां दधानो
व्याख्याहेतोर्मुनिपरिषदा सेव्यमानः समन्तात् ।
वैयाघ्रीयां त्वचमभिनवां वेष्टयन्नष्टमूर्तिः
किं ते मूलं बत ! वटतरो ! दक्षिणामूर्तिरागात् ॥ ४६ ॥

धत्से मौलौ नवशशिकलाकोमलं कुग्मलं त्वं
गङ्गाभङ्गाभ्यधिकमधुरां माकरन्दीं च धाराम् ।
शूलाकारैस्तव किसलयैर्भान्ति शाखाकराग्राः
किं ते ब्रह्मद्रुम ! परिसरं प्राप्तवान् कृत्तिवासाः ॥ ४७ ॥

भ्रातर्दृष्टः किमु स भगवान् ब्रूहि मह्यं वराह !
त्वत्सम्प्राप्त्या पुनरहरिदं वर्तते मे वराहः ।
अन्विष्य त्वामचरदटवीं यः किरातात्मना प्रा-
गापातालं त्वमपि गतवानङ्घ्रिमन्विष्य(?यस्य)यस्मिन् ॥

मौलिं यस्य त्वमसि गतवान् वीक्षितुं हंस ! पूर्वं
चूडासिन्धोः कृतविहरणैः पूजितो राजहंसैः ।
अस्मद्धेतोः पुनरपि परं हंसमन्वेषयामुं
योगारूढो हृदयकमले प्रेक्ष्यते यश्च हंसः ॥४९॥

गच्छोपान्तं हरिणि ! करुणाक्रान्तचित्ता मयि त्वं
सन्देशं च प्रकटय विभोः क्षिप्रमेणाङ्कमौलेः ।
तत्पाणिस्थे तरुणहरिणे साभिलाषा न भूया-
श्चूडाचन्द्रप्रणयिहरिणीमग्नचित्तः स मुग्धः ॥५०॥

बर्हिन् ! ब्रूहि त्वमिह बहुभिर्माननीयैर्विहङ्गैः
कस्मिन् देशे समुपदिशसि त्वादृशां लास्यमीशः ।
बर्हान् बाहूनिव लयवशान्मण्डलीकृत्य नृत्यन्
देवः साक्षाच्छिव इव पुरो नृत्येत नीलकण्ठः ॥५१॥

श्लाघ्यासि त्वं शिवशिवशिवेत्यालपन्ती समन्ता-
च्छ्रोत्रद्वन्द्वं शिशिरयासि मे शारिके ! स्वस्ति तेऽस्तु ।
सल्लापानां फलमविकलं लब्धमेव त्वया मे
शंस स्वैरं मुहुरपि शिवं श्रेयसे श्रद्दधानाम् ॥५२॥

बिभ्रच्चापं श्वभिरभिवृतो बर्हिबर्हावतंसः
केशाभोगग्रथनविलसत्किङ्किरातः किरातः ।
किं ते कृत्तिं दलयितुमसावग्रतः कृत्तिवासाः
कस्माद्धेतोर्व्यथितहृदयो व्याघ्र ! शीघ्रं प्रयासि ॥५३॥

हंहो वन्यद्विपवर! हरः केत्यभिव्याहरन्त्यै
प्रत्युक्तिं मे दिशसि न कुतः किं मदान्ध्यं तवैतत् ।
निर्भिद्य त्वां नदतु परितो मण्डलीकृत्य दोर्भि-
र्ब्रह्माण्डान्तःप्रलयसमये प्राग्यथा भूतनाथः ॥ ५४ ॥

सिंह! कास्ते शिव इति मया पृच्छ्यमानोऽनुरागाद्
दर्पात् तूष्णीं निवससि यदि त्वं गुहायां हिमाद्रेः ।
बिभ्रन्मूर्तिं शमनमथनः शारभीमष्टपादां
भित्त्वा वक्षस्तव पृथुतरं भूषयेत्वान्त्रमालाम् ॥ ५५ ॥

व्यायामान्ते स्वकरकमलैर्मर्शयित्वा तवाङ्गं
सिञ्चेदद्भिः सह यदि गणैः शङ्करः शाकर! त्वाम् ।
तस्मिन् काले तव जलधरस्निग्धगम्भीरघोषै-
रत्यारूढं स्मरपरिभवं ब्रूहि मे कामशत्रोः ॥ ५६ ॥

यस्त्वां पूर्वं जलधिमथने मन्दरे दृष्टसारं
मौर्वीं कुर्वन्नसुरनगरीं मेरुधन्वा ददाह ।
भूषा देहे त्वमसि विपुले लाल्यमानोऽस्मि नित्यं
भोगीन्द्रास्मानानितरगतीरञ्जसा वेदयास्मै ॥ ५७ ॥

साकं चान्द्र्या शिरसि कलया शम्भुना लाल्यमाना
कोटीराग्रात् किमिति गलिता किं त्वया वापराद्धम् ।
तुङ्गे शृङ्गे निपतसि गिरेरङ्गमोक्षाय गङ्गे!
देहत्यागो गिरिशविरहे जीविताच्छ्लाघ्य एव ॥ ५८ ॥

इत्थं गौरीमुपवनतले मुक्तकण्ठं रुदन्तीं
निध्यायन्तीं निखिलभुवनस्वामिनं नीलकण्ठम् ।
सख्यावाश्वासयितुमलसां तत्क्षणं नालमास्तां
हृद्ये तस्मिन्नपि हिमगृहे हन्त शैत्योपचारैः ॥ ५९ ॥

यस्यां वेद्यां स चिरमवसच्छम्भुरारूढयोग-
स्तस्यामेव प्रमथपतिभिः सेव्यमानः समन्तात् ।
नीलग्रीवप्रतिकृतिमथो निर्ममाते वयस्ये
नीहाराद्रेस्तटसमुदितैर्नूतनैरेव रत्नैः ॥ ६० ॥

(फालं तस्य) स्फटिकशिलया पद्मरागेण पादौ
वैडूर्येण स्तिमितनयनं विद्रुमौघैः कपर्दान् ।
कण्ठाभोगं गरुडमणिना मौक्तिकैर्दन्तपङ्क्तिं
गङ्गां स्विद्यत्तुहिनदृषदा चन्द्रकान्तेन चन्द्रम् ॥ ६१ ॥

देवी साक्षाच्छिव इति मुदा त्रीक्षणं वीक्षमाणा
प्रागवत्तस्यापचितिमुचितामाचरन्ती सखीभ्याम् ।
अङ्गस्यार्धे प्रतिफलितया छाययार्धेन्दुमौले-
रैक्यं प्राप्तामममनुत निजां मूर्तिमद्रीन्द्रपुत्री ॥ ६२ ॥

तल्लावण्यं तदपि च वपुः सैव धीरासिकेयं
तान्येवैतान्युपरतपरिस्पन्दनानीक्षणानि ।
मुद्राप्येका करकिसलये लक्ष्यते सैव भद्रा
मन्त्राभ्यासैर्मधुरमधरस्पन्दनं क्व प्रयातम् ॥ ६३ ॥

किं स्वातन्त्र्यं किमुत महिमा किन्नु योगप्रभावः
किं धीरत्वं किमधिगुणता किं तवार्धीश्वरत्वम् ।
भस्मीभूतं नयनशिखिना निर्घृणं पञ्चबाणं
मुग्धाया मे मनसि बहुधा जृम्भयन् निर्वृतोऽसि ॥

भूतः किं वा विसदृशमिदं किं कृपाया वियुक्तः
किं हीयेरन् भुवनमहिता भूतयो वाणिमाद्याः ।
हास्यं कुर्युः किमुत विबुधाः किं जळत्वं तव स्यात्
कस्माद् दोषाद् गिरिश ! परितो न प्रपन्नोऽसि
मे त्वम् ॥ ६५ ॥

इत्यालप्य प्रियमनितरोपायलभ्यं विदित्वा
पूजाहेतोः प्रतिकृतिमिमां स्थापयित्वा पुरस्तात् ।
तस्मिन्नत्र त्रिभुवनगुरोराश्रमे श्रान्तचित्ता
तेपे तीव्रं सकलजगतां तापहन्त्री तपांसि ॥ ६६ ॥

मौञ्जीं काञ्चीपदविनिहितां मेखलां सन्दधाना
सूत्रं ब्राह्मं हृदि सुमधुरां हारयष्टिं विहाय ।
प्लक्षक्षीरस्रुतिकृतजटाबन्धना सा सुकेशी
वीतक्षौमा वनतरुभवे वल्कले पर्यधत्त ॥ ६७ ॥

गौरी घोरे तपसि परितो दिक्षु निक्षिप्य वह्नीन्
मध्ये तेषामवसदनिशं वीक्षमाणार्कबिम्बम् ।
पद्मीभूताः सततमभवन् पावकाः पद्मनेत्री
चन्द्रीभूय द्युमणिरपि तामभ्यषिञ्चत् सुधाभिः ॥ ६८ ॥

नित्यं शुद्धैः शुशुधुरुटजं नीलकण्ठाः शिखण्डै-
गण्डस्रावस्रुतमदजलैर्गां न्यषिञ्चन् गजेन्द्राः ।
हंसाः पक्षैरनलमधमन् होमकालेष्वमुष्याः
पत्रं पुष्पं फलमपि वनाद् वायवश्चोपनिन्युः ॥ ६९ ॥

अप्सु स्नातामवनिशयनामाग्निमध्ये निषण्णां
वाताहारां वियति परमे मानसं योजयन्तीम् ।
चन्द्रादित्यप्रहितनयनामात्मयोगोदितां ता-
मङ्गैस्तन्वीं तपसि च निजैरालिलिङ्गाष्टमूर्तिः ॥ ७० ॥

इत्यम्बिकालापे पूर्वालापः समाप्तः ।

[उत्तरालापः]

मौञ्जीकृष्णाजिनपरिवृतः शुभ्रयज्ञोपवीती
हस्ते दण्डं विमलसलिलां कुण्डिकां चादधानः ।
फाले वक्षस्यपि च भुजयोर्न्यस्तभस्मत्रिपुण्ड्रः
प्रादुर्भूतः सपदि गिरिशः कैतवब्रह्मचारी ॥ १ ॥

आरादेत्य प्रियसहचरीदत्तवेत्रासनस्थः
कल्याणीं तां सदयमृजुना चक्षुषा वीक्षमाणः ।
मार्गश्रान्तिं सपदि मधुपर्कादिभिर्यापयित्वा
वाग्मी वाचं तदनु सुतरामब्रवीत् क्षुद्रशक्तिः ॥ २ ॥

सौवर्णीव द्रुतिमुपगता निष्कलङ्का शलाका
मध्येऽग्नीनां तव वरतनो राजते मूर्तिरेषा ।
सख्योर्मध्ये वहसि यमुनागङ्गयोरन्तराले
गूढं सारस्वतमिव पयः पावनं सूक्ष्ममङ्गम् ॥ ३ ॥

ऐश्वर्यं ते न खलु विकलं यौवनारम्भयोगा-
दम्लानश्रीरियमभिनवा स्निग्धलावण्यरेखा ।
नूनं नैव त्वदभिलषिता दुर्ल(भो?भा) दुर्ल(भा?भं)स्या(त्)
किं कल्याणि ! प्रबलतपसा प्राप्यमस्तीत्यपृच्छत् ॥

व्रीलावेशादपि च तपसा मौनमेव प्रपन्ना
बाला तस्मै मनसि निहितं सूचयन्तीव (तस्थौ) ।
वक्षोमध्यं वलितवदना प्रैक्षताम्भोरुहाक्षी
सख्यौ तस्याः स्फुटमवदतां वाचमाचारभूताम् ॥

विद्वन् ! विद्याः प्रियसहचरीमीश्वरे बद्धभावां
वाञ्छासिन्धुः खलु निरवधिः कोमळा योषिदेषा ।
धीरास्तेऽन्ये शिरसि धनुषाप्यश्मना ताडयित्वा
हित्वातङ्कं (नि)रयमपि ये (म?त)स्वत्‌रूपं भजन्ते ॥

भित्त्वा शीर्ष्णां दशकमजुहोद्रावणो जीवितार्थी
चक्रावाप्त्यै नयनकमलं चक्रपाणिर्दिदेश ।
एषाप्यग्नौ तप इति महत् साहसं हन्त धत्त
को जानीते कथमिव भवेद्देव एव प्रमाणम् ॥ ७ ॥

नैव ज्यायो न पुनरनु वा नावरं वा वरं वा
यस्मादन्यज्जगति विततं विद्यते नैव किञ्चित् ।
एको देवः स खलु निखिलप्राणिवर्गा(न्तरा)त्मा
निर्व्याजोद्यन्निजकरुणया नः प्रसादं करोतु ॥ ८ ॥

दग्धं येन त्रिपुरममरैः स्तूयमानेन दीनैः
पीतं हालाहलमपि पुरा हेलया लोकगुप्त्यै ।
घोरं तादृक् किमपि विभुना साहसं नात्र कार्यं
सान्निध्यं चेत् स तु वितनुतात् तावता स्मः कृतार्थाः ॥९॥

सख्योर्वक्त्रादिति समुदितां वाचमाकर्ण्य वर्णी
मान्यामेनां मुहुरपहसन्नेवमेवं बभाषे ।
बाला हन्त प्रबलतपसा फल्गुमाकांक्षतेऽर्थं
किं कल्याण्या विसदृशमिदं सम्मतं वामपीष्टम् ॥ १० ॥

ईशोऽस्तीति भ्रमितजगतामिच्छतां (पत्युरीवृत्यु)पायं
वादः कश्चित् प्रवचनविदां वेद्यते वैदिकानाम् ।
नै(वंनै) वाचामपि च मनसां गोचरं प्राहुरन्धा
मुग्धे श्रद्धां रचयसि मुधा वस्तुशून्येऽपि शब्दे ॥ ११ ॥

कीदृग्रूपः किमुपकरणः किंगुणः किंचरित्रः
कैर्वा मुग्धे कथय करणैरेष निर्धारणीयः ।
वस्त्वस्तीति भ्रमति सुतरामीश्वरे शब्दमात्रे
गन्धश्रद्धा गगनकुसुमे जायते कस्य जन्तोः ॥ १२ ॥

कल्याण्येवं कपटवटुना व्याहृता सापहासं
मौनग्रन्थिं सुचिरविधृतं मन्दमन्दं निरुद्धय ।
दिव्यां वाणीं दशनकिरणैर्द्योतयन्ती नितान्तं
तत्प्रत्युक्तिं सुतनुरतनोत् तत्क्षणं युक्तियुक्ताम् ॥१३॥

वेदाभ्यासैर्विविधतपसा विद्यया ब्रह्ममय्या
(मीमां)नैर्मन्त्राभ्यसनविधिना ध्यानयोगेन शान्त्या ।
यज्ञैर्दानैरपि सुमनसो (यं प्रियत्प्र)यार्थं यतन्ते
तस्यावाप्त्यै यदि न यतसे ब्रह्मचर्यं किमर्थम् ॥ १४ ॥

जन्तोरन्तः स्फुरति हृदये यः किलाणोरणीयान्
ब्रह्मादीनामपि च मनसां वर्तते यो महीयान् ।
स्वात्मानन्दं न गणयसि चेदीशमज्ञानपाशा-
दादित्योऽस्तीत्यवगमयितुं कौशिकं कः समर्थः ॥१५॥

यादृग्रूपो यदुपकरणो यद्गुणो यच्चरित्रो
योऽनाद्यन्तः स कथमितरैः शक्यनिर्धारणः स्यात् ।
नो चेदीशः कथय जगतामुद्भवादौ कुतस्त्वां
कस्माद् भीतो भ्रमसि हि पुनः कालचक्रे विवस्वान् ॥

यस्याद्यन्तौ शतधृतिरसौ नाक्षितुं नालमास्तां
कस्तद्रूपं परिगणयितुं शक्नुयात् क्षुद्रशक्तिः ।
अद्याप्येनं विशुमुपनिषत् केत्यनिर्धार्य रौद्री
सर्वान् भावान् नमति शतशः स्थावरान् जङ्गमांश्च ॥१७॥

मेरुर्यस्य स्थिरधनुरभूद् वासुकिर्ज्या वरिष्ठा
क्षिप्रश्चेषुः परमपुरुषस्ताः शरव्यं नगर्यः ।
वेदा वाहास्तरणिशशिनौ चक्रयुग्मं रथः क्ष्मा
वेधा यन्ता किमिह बहुना तादृशः कोऽस्ति वीरः ॥

हव्यै(र्गव्यै)र्हुतवहमुखे यज्वभिः पूज्यमानो
यः सन्तुष्टः फलमविकलं पुण्यकृद्भ्यो ददाति ।
दक्षो देवैः सह परिभवं प्रापयन् योऽवमानात्
कस्तं निन्द्याद् बहुलतमसा त्वां विना लोकनाथम् ॥१९।

बाल्यान्मौग्ध्यादुत विधिवशात्(प्राक्तनात्)कर्मबन्धा-
दज्ञानान्ध्यादपि च भवता नेश्वरः स श्रुतश्चेत् ।
शुश्रूषाभिः श्रुतिपरिणतान् पण्डितान् प्रीणयित्वा
श्रुत्वा तेभ्यस्त्रिभुवनगुरुं श्रेयसे संश्रय त्वम् ॥ २० ॥

चित्तारूढो यदि न भवतः शङ्करो मद्वचोभिः
पश्येत्यग्रे प्रतिकृतिमहो शाम्भवीं दर्शयित्वा ।
एवं ध्यात्वा हृदयकमले देवमाराधय त्वं
जात्या विप्रस्त्वमसि महितो जन्मसाफल्यसिद्ध्यै ॥२१॥

इत्थं गौर्या वचसि विरते वर्णयामास वर्णी
   तत्सल्लापश्रवणकुतुकच्छादितान्तःप्रमोदः ।
जाने द्वौ वां सुदति! भवतीं भद्ररूपामभद्राम्
   रुद्रं क्षुद्राचरितमपि तं चेतसा तेन दूये ॥ २२ ॥

उन्मत्तो यः पिबति गरलं नृत्यति त्यक्तवासाः
   शेते भूतैः सह पितृवने शावभस्मास्थिभूषः ।
भिक्षामत्ति प्रतिदिनमसौ ब्रह्महत्यानुषङ्गात्
   को वास्त्यन्यस्त्रिभुवनतले तादृशो दुर्विनीतः ॥ २३ ॥

मौलिर्यस्याभ्यधिकजटिलो लोचनं फालमध्ये
   कण्ठे क्ष्वेडद्रवकलुषितं कर्बुरं भस्मनाङ्गम् ।
वृद्धेनोक्ष्णा गमनमनघे! वेष्टनं जीर्णकृत्त्या
   कांक्षेतैनं विकृतवपुषं का त्वदन्या वराङ्गी ॥ २४ ॥

अस्मात् सद्यो विरम रसिके! कुत्सितादीप्सितात् त्वं
   निन्दन्त्येते! सुदति! भवतीं जन्तवः सर्व एव।
बाले! ब्रूहि त्वदभिलषितं यः पुराणस्तपस्वी
   किं जानीते मनसिजरसं कामवैरी किलासौ ॥ २५ ॥

इत्थं श्रुत्वा श्रवणपरुषं शब्दमाषाढिणोक्तं
   रोषारूढं मनसि तपसा ह्रासभीत्या निरुद्ध्य ।
शापो (द) (द्रयेऽग्र्यं)प्रतिवचनमेवाददे मञ्जुवाणी
   जातिब्राह्मं वहसि च वपुर्निन्दसि ब्रह्म धिक् त्वाम् ॥

क्षीराम्भोधेरधिकमथनक्षोभसम्भूतखेदात्
............गतीन्द्रमुज्जृम्भमाणे ।
कान्ते देवासुरपरिकरे कान्दिशीके समन्ता-
न्नाचान्तं चेद्गरळममुना क्वेव विश्वं क वा त्वम् ॥ २७ ॥

धातुर्दर्पादनुचितगिरः पञ्चमे मूर्ध्नि कृत्ते
प्रायश्चित्तं चरति गिरिशे भिक्षमाणः कपाले ।
ब्रह्मेन्द्राद्यं भुवनमखिलं संहर(न्न)न्तकाले
भिक्षार्थं क व्रजतु भगवान् क्वेव सा ब्रह्महत्या ॥ २८ ॥

दिग्गोळं वा वसतु दलितं चर्म वा दिग्गजानां
भस्मालेपो भवतु विलसच्चन्दनालेपनो वा ।
आकल्पान् वा भजतु सुभगान् भीषणान् वा भुजङ्गान्
किं वा कान्त्यै न भवति विभोर्मङ्गलावासमूर्तेः ॥ २९ ॥

शेतामीशः पितृवनतले शेखरे वा श्रुतीनां
वृद्धेनोक्ष्णा व्रजतु भगवान् मत्तदिग्दन्तिना वा ।
कालोत्तीर्णः कबलयतु वा कालकूटं सुधां वा
शास्यः केषां सकलजगतां शासिता शूलपाणिः ॥ ३० ॥

किञ्चित् पश्चादपि च परुषं वक्तुकामोऽयमास्ते
डिम्भः शम्भोस्तिरयति विभोरानुभावं पुरो मे ।
वा(मा)चारो न खलु विरमेद्धार्यतामेष सख्यौ !
यास्यामो वा वयमिति तदा गन्तुमासीत् प्रवृत्ता ॥३१॥

................किङ्करः शङ्करोऽसौ
मा गच्छेति स्मितसितरुचा वाङ्मयेनानुगृह्णन् ।
ब्रह्मेन्द्राद्यैरमरनिकरैर्वन्द्यमास्थाय वेषं
यान्त्यास्तस्याः करकिसलयं शङ्करोऽप्याललम्बे ॥

हस्तालम्बप्रणयिनि हरे विह्वलीभूतचित्ता
व्यावृत्ताङ्गी ललितवदना वल्लभं वीक्षमाणा ।
कालोन्मीलत्कुवलयकुलस्पन्दसौन्दर्यलक्ष्मी-
रिन्दोः स्पर्शादमृतलहरीवोल्ललासाद्रिकन्या ॥ ३३ ॥

बाल्यान्मौग्ध्यादपि चलतया स्त्रीस्वभावाद्यदुक्तं
क्षन्तव्यं तत्परुषवचनं स्वामिनेति ब्रुवन्ती ।
सानुक्रोशे सति च गिरिशे सापराधेति भीता
मुग्धा मूर्ध्ना प्रणतिमकरोदम्बिका त्र्यम्बकाय ॥३४॥

संस्तम्भ्योद्यत्पुलकमुकुलं साध्वसस्विन्नमङ्गं
भक्त्यावेशाभ्यधिकगलितानन्दबाष्पाकुलाक्षी
वाचां गुम्फैरधिकमधुरैर्वागधीशं महेशं
सा प्राशंसत् प्रणयविवशा वास्तवेन स्तवेन ॥ ३५ ॥

प्रत्यक्षादिप्रमितिकरणैरप्रमेयानुभावः
प्रत्यक्षं नः स्फुरति भगवन् ! केवलं सा कृपा ते ।
दूरे वाचामपि च मनसां वर्तमानस्य मन्ये
मायामूर्तिं तव पुनरिमां मादृशां रक्षणार्थम् ॥ ३६ ॥

स्थूलं सूक्ष्मं परमिति भवन्मूर्तयो विश्वमूर्ते !
कर्ता कार्यं करणमिति ते देव (यः सः) शिवात्मा ।
(नों शा?)भूतं भव्यं भवदिति कलाः कालरूपस्य शम्भोः
शक्तिः शान्तः शिव इ(ति) पुनः स्वानुभूतिप्रकाशः ॥३७॥

पादाम्भोजं फणिपतिपरिष्कारि पातालमूलं
पृथ्वी श्रोणी जलधिवसना बाहवोऽष्टौ दिगन्ताः ।
मौलिर्व्योम त्रिदशतटिनीचन्द्रखण्डाभिरामं
त्वामाचष्टे स्फुटमुपनिषद् व्योमकेशं विराजम् ॥ ३८ ॥

ब्रह्मा भूत्वा सृजसि रजसा वर्तमानास्त्रिलोकीं
सत्त्वोद्रिक्तं सदवनविधौ वैष्णवं धाम धत्से ।
कल्पापाये हरसि तमसाप्यत्र रुद्रात्मना त्वं
निस्त्रैगुण्यं परिविहरतः कीदृशी केलिरेषा ॥ ३९ ॥

विन्दन्त्यन्तर्हृदयकमले बिन्दुनामात्मकं ते
ज्योतिर्लिङ्गं वपुरनुपमं योगिनो योगिगम्यम् ।
तस्याप्यन्तः स्फुरति परमानन्दसंवित्स्वरूपो
यस्मिन् दृष्टे न खलु (पु)नरावर्ततेऽतीव लोकः ॥ ४० ॥

भूते भूते प्रतिफलसि किं भानुमालीव तोये
दीपाद्दीपा इव खलु समुद्दीपिता द्योतसेऽन्याः ।
त्वय्येव त्वं किमु विवलसे वीचिमालेव सिन्धौ
कुम्भे कुम्भे गगनमिव किं वर्तसे मुक्तसङ्गः ॥ ४१ ॥

एकं भिन्नं सगुणमगुणं सक्रियं विक्रियं वा
 निस्सामान्यं त्रिभुवनगुरो ! त्वां न निर्धारयामि ।
दिव्यं चक्षुः प्रदिश गिरिश ! छिन्नहृद्ग्रन्थिबन्धं
 याथार्थ्यं ते हृदि विहरतो येन साक्षात्करोमि ॥

शब्दब्रह्माधिगमितरब्रह्मधाम्ने स्वधाम्ने
 पञ्चब्रह्मप्रभवतनवे ब्रह्मणा मृग्यभूम्ने ।
ब्रह्माण्डान्तर्बहिरपि सते ब्रह्मविद्योपदेष्ट्रे
 ब्रह्मिष्ठानां हृदि विहरते ब्रह्मणे ते नमोऽस्तु ॥ ४३ ॥

स्तोत्रप्रीतं तदनु सुतनुर्देवमालिङ्गनोत्कं
 स्वामिन् ! दाता हिमगिरिरिति व्याहरन्ती विहाय ।
प्रेक्ष्य प्रेक्ष्य प्रियमनुपदं मन्दिरं गन्तुकामा
 मुग्धा मार्गं मृदुलगमना दीर्घदीर्घीचकार ॥ ४४ ॥

बद्धोद्योगां भवनगमने पार्वतीं पूर्वपत्नीं
 नैवाशक्नोत् स च पशुपतिस्त्यक्तुमालम्बितुं वा ।
माकन्दानामभिनवमधुस्यन्दसन्दोहसान्द्रां
 वाताघातामिव विधुरितो मञ्जरीं चञ्चरीकः ॥ ४५ ॥

देवादेशाद्दृषिभिरचलः पार्वतीं प्राथ्र्यमानः
 प्रत्याश्रौषीत् कुलमपि निजं केवलं नैव कन्याम् ।
ईशोऽप्याशु प्रति(समदधात्?सरमधाद्) दक्षिणस्मिन् प्रकोष्ठे
 प्रागेवान्यस्त्रिपुरविजये वासुकि(ज्याकि)णाङ्कः ॥४६॥

क्षीराम्भोधेरथ दिविषदो मङ्क्षु माणिक्यराशिं
(क्षामांक्षौमं) कल्पद्रुमविटपितो मानसादुत्पलानि ।
मेरोर्दिव्याभरणनिकरं मौक्तिकं ताम्रवर्ण्या
मान्यं शम्भोर्मलयकटकाच्चन्दनं चोपजह्रुः ॥ ४७ ॥

इन्दोर्लेखा प्रसभमभजत् केतकीपत्रभङ्गीं
मन्दाकिन्यप्यधिकललिता मल्लिकामालिकाभूत् ।
सर्पाः स्वर्णाभरणमभवन् मौलिरत्नोत्तमध्या-
च्छम्भोरिच्छानुगुणमखिलं मङ्गलाकारमासीत् ॥ ४८ ॥

चन्द्रादित्यौ दधतुरुभयोः पार्श्वयोस्तालवृन्तं
छत्रद्वन्द्वं हरिशतधृती चामरं चामरेन्द्रः ।
दिव्यान्यस्त्राण्यपि दिविषदो नन्दिकेशश्च केतुं
हृद्यं वाद्यं प्रमथपतयः काहळीमद्दळाख्यम् ॥ ४९ ॥

सद्यः सम्मार्जनमरचयद्राजमार्गस्य वायुः
पाशी पश्चादमृतसलिलैः सेचयामास वीथीम् ।
सम्मर्दोत्सारणमकुरुतां राक्षसप्रेतनाथौ
स्वस्त्याख्यानैः सुरमुनिगणाः शङ्करं पर्यगृ(ह्णात्।ह्णन्) ॥

उच्चैः क्लृप्तध्वजपटावितानोल्लसत्स्वर्णकूटां
कूटोच्छ्रायैः कनकरुचिरैर्गोपुरैर्दूरदृश्याम् ।
प्रेम्णा प्रत्युद्व्रजति किमिति प्रेक्षितामुक्षवेगा-
दद्धामद्रेरगमदमरैरीश्वरो राजधानीम् ॥ ५१ ॥

श्रीकैलासप्रतिभ(गौट)वृषस्कन्धभागाधिरूढं
तूर्याघोषैर्मुखरितहरिच्चक्रवालान्तरालम् ।
हेलावेल्लत्प्रमथपरिषद्घुष्यमाणापदानं
शैलाधीशः स खलु गिरिशं प्रत्युदैत्सानुबन्धः ॥५२॥

सज्जीभूताः प्रतिगृहमथो सौधवातायनस्था
वीथीं प्राप्ते सति सुरगणैरोषधीशार्धमौलौ ।
लाजैर्वृष्टिं विदधुरमलैरोषधिप्रस्थयोषा
डोलारूढात्रिदशवनितागीतदिव्यापदाने ॥ ५३ ॥

वीथ्यां वीथ्यां ललितवनितावीक्षणैर्लक्ष्यमाण-
द्वारोदञ्चत्कनककदलीपूर्णकुम्भप्रदीपम् ।
शैलाकारं सकलभुवनश्लाघ्यसौन्दर्यमागात्
साले साले प्रतिफलितया छायया स(श्च)रन्त्या ॥५४॥

यस्मिन् देवा हृदि विदधते जङ्गमालेख्यशङ्कां
सौधैर्यस्मिन्नुपरिविलसत्कात्रिमानेकसत्त्वैः ।
छायादानात् स्थलमुपगत... ... ...
... ... स्मायुतेनागलोकः ॥ ५५ ॥

क्षीरेणाङ्घ्रिं निगमसुरभिं क्षालयित्वा पुरस्ता-
द्रक्षाहेतोः शिरसि धवलान्यक्षतानि क्षिपन्ती ।
जामातेति ह्रियमपि मुदं धारयन्ती नितान्तं
मेना तस्मै सपदि मधुपर्कादिकं चोपनिन्ये ॥ ५६ ॥

रत्नस्तम्भेष्वपि मणिमये कुट्टिमे रत्नसाले
साध्वीं सौधेष्वपि च बहुधा छायया विस्फुरन्तीम् ।
उद्गच्छन्तीं सह परिकरैरीश्वरो रत्नपीठा-
न्मान्यां प्राप्तो मरतकमणिश्यामवर्णामपर्णाम् ॥ ५७ ॥

धम्मल्लान्तर्नियमितदरोत्फुल्लकल्हारमालां
कर्णोत्तंसीकृतकुवलयाश्लेषमाद्यत्कटाक्षाम् ।
कण्ठे मन्दस्मितसहचरीं हारयष्टिं दधानां
कन्यां दास्यन् कनककलशात् तीर्थतोयं गृहीत्वा ॥ ५८ ॥

शैलाधीशः शिव ! तव पिता कः पुनः का च माता
किं वा गोत्रं क उत सहजाः को गुरुर्वेति पृष्ट्वा ।
तूष्णीम्भूते सति पशुपतावुत्तरं मार्गमाणे
सान्तर्हासो दुहितरमदाच्छाश्वतायेश्वराय ॥ ५९ ॥

देवीं दिव्याभरणनिकरद्योतिताशावकाशां
विद्युद्वल्लीविततिभिरिव व्याकुलां मेघमालाम् ।
हर्षोत्कर्षोपचितपुलकाङ्कूरशृङ्गारिताङ्गीं
पत्नीं पाणिग्रहणविधिना पर्यगृह्णात् पिनाकी ॥ ६० ॥

देव्यो देवाश्चिरमरमयंस्त्यक्तदैत्योपरागा-
न्
सर्वो जन्तुः सहजपरमानन्दसिन्धौ ममज्ज ।
कामं लेभे तनुमभिनवां सोऽपि कामः सकामो
मोक्षं प्राप्ता इव मुमुदिरे विष्टपस्तुष्टपुष्टाः ॥ ६१ ॥

स्तुत्वा वीरं सकलजगतां रक्षितारं कुमारं
  सेनारातिं युधि दिविषदां तारकं दारयित्वा ।
पार्वत्येषा परिणतशरत्पार्वणेन्द्वाभवक्त्रा
  शर्वस्याङ्के विहरति चिरं शर्वरीशार्धमौलेः ॥ ६२ ॥

वागीशोऽलं न खलु वदनैर्वेदगर्भेश्चतुर्भिः
  का मे शक्तिर्भुवि कथयितुं शाम्भवं वैभवं तत् ।
भक्त्या क्लृप्तं तदपि शिवयोः प्रीतये काव्यमेत-
  च्छ्रद्धावन्तः शृणुत रसिका भूतये श्रेयसे वा ॥ ६३ ॥

[अस्ति स्वस्तितरं समस्तजगतां विश्वंभरामण्डले
  शस्तं ब्रह्ममयाख्यमीप्सिततरं कैलासतश्शूलिनः
ख्यातं तत्र मुकुन्दमङ्गलगिरा धामास्ति सन्मानितं
  जातोऽस्मिन् परमेश्वरोऽलिखदुमालापं समग्रं सुधी ॥]

श्लोकानुक्रमणी

श्लोकाः	पृष्ठम्	श्लोकाः	पृष्ठम्
अग्नीन् पञ्च स्वयमुपहरन्	९	कल्याण्येवं कपटवटुना	१८
अङ्कारूढामभिनव	१	काले तस्मिंस्त्रिदश	८
अङ्गच्छायाममृत	३	किं स्वातन्त्र्यं किमुत	१४
अत्यादित्यद्युति	२	किञ्चित्पश्चादपि	२१
अप्यत्यन्तं निभृत	९	कीदृग् भाग्यं परिणत	३
अप्सु स्नातामवनि	१५	कीदृग्रूपः किमुपकरणः	१८
अर्धोन्मीलन्नयन	२	क्रीडालौल्यं तव खलु	४
अस्ति स्वस्तितरं	२८	क्षीराम्भोधेरथ	२५
अस्मात्सद्यो विरम	२०	क्षीराम्भोधेरधिक	२१
आरादेत्य प्रियसहचरी	१६	क्षीरेणाङ्घ्रिं	२६
इत्थं गौरीमुपवनतले	१३	गङ्गाभङ्गाभ्यधिक	५
इत्थं गौर्या वचसि	२०	गच्छोपान्तं हरिणि	११
इत्थं श्रुत्वा श्रवणपरुषं	,,	गौरी घोरे तपसि	१४
इत्थं सख्योः श्रुतिपुट	६	चन्द्रादित्यौ दधतु	२५
इत्यालक्ष्य प्रियमधिक	३	चित्तारूढो यदि न भवतः	१९
इत्यालक्ष्य प्रियमनितरो	१४	चित्रं मेरुः स्फुरति	२
इन्दोर्लेखा प्रसभं	२५	चूडाकोटित्रिदश	१०
ईशोऽस्तीति भ्रमित	१७	जन्तोरन्तः स्फुरति	१८
उच्चैः क्लृप्तध्वज	२५	तल्लावण्यं तदपि च	१३
उन्मत्तो यः पिबति	२०	दग्धं येन त्रिपुर	१७
एकं भिन्नं सगुणमगुणं	२४	दाक्षायण्या पितृकृत	५
एष ह्यादिः सकलजगतां	६	दिग्गोळं वा वसतु	२१
ऐश्वर्यं ते न खलु	१६	देवादेशादृषिभिरचलः	२४

श्लोकाः	पृष्ठम्
देवीं दिव्याभरण	२७
देवी साक्षाच्छिव इति	१३
देव्यो देवांश्चिरं	२७
धत्से मौलौ नवशशि	१०
धम्मिल्लान्तर्नियमित	२७
धम्मिल्लेभ्यो बहळ	७
धातुर्दर्पादनुचित	२१
नन्दीशाद्यैः प्रमद	७
नित्यं गौरी नियम	८
नित्यं शुद्धैः शुशुधु	१५
नेशः क्रोधी नियत	९
नैव ज्यायो न पुनरनु	१७
पादाम्भोजं फणिपति	२३
पाद्याबेतौ स खलु	३
पृथ्वीपाथःपवन	९
प्रत्यक्षादिप्रमितिकरणैः	२२
प्राप्ता गौरी पितुरुपवनं	१
फाले यस्य स्फटिक	१३
फाले नेत्रं पृथुनि	२
बद्धोद्योगां भवनगमने	२४
बर्हिन् ब्रूहि त्वमिह	११
बाल्यान्मौग्ध्यादपि	२२
बाल्यान्मौग्ध्यादुत	१९
बिभ्रच्चापं श्वभिरभिवृतो	११
ब्रह्मा भूत्वा सृजसि	२३

श्लोकाः	पृष्ठम्
भक्तिश्रद्धाद्यातिशय	१
भक्त्युद्रेकस्फुरित	४
भद्रे किञ्च स्मरतु	,,
भित्त्वा शीर्ष्णां दशक	१७
भूतः किं वा विसदृश	१४
भूते भूते प्रतिफलसि	२३
भ्रातर्दृष्टः किमु स	१०
मन्दाकिन्यप्यधिक	५
मुञ्चत्येकं शरमपि	८
मुद्रां भद्रां करकिसलये	१०
मूर्च्छां प्राप्य प्रसभ	९
मेरुर्यस्य स्थिरधनुरभूत्	१९
मौञ्जीं काञ्चीपद	१४
मौञ्जीकृष्णाजिन	१५
मौलिं यस्य त्वमसि	११
मौलिर्यस्याभ्यधिक	२०
यस्त्वां पूर्वं जलधि	१२
यस्मिन् देवा हृदि	२६
यस्यां वेद्यां स चिर	१३
यस्याद्यन्तौ शतधृति	१९
यादृग्रूपो यदुपकरणो	१८
यावत् कामो धनुषि	८
रत्नस्तम्भेष्वपि	२७
रोमाञ्चानामनुभव	६
लक्षीभूतः पुरुष	२

श्लोकाः	पृष्ठम्	श्लोकाः	पृष्ठम्
लावण्यानां नवशशि	७	सत्यं भाग्यैः फलित	४
वागीशोऽलं न खलु	२८	सद्यः फुल्लं स्वयमुपहृतं	६
वामं भूमौ करमुरुतरं	५	सद्यः सम्मार्जन	२५
विद्वन् विद्याः प्रिय	१६	सल्लापाश्च श्रवणमधुराः	४
विन्दन्त्यन्तर्हृदय	२३	साकं चान्द्र्या शिरसि	१२
वीथ्यां वीथ्यां	२६	सिंह क्रास्ते शिव इति	१२
वेदाभ्यासैर्विविधतपसा	१८	सिद्धिं योगादिव	७
व्यायामान्ते स्वकर	१२	सुप्तं सिंहं निभृत	८
व्रीळावेशादपि च	१६	सूत्वा वीरं सकलजगतां	२८
शब्दब्रह्माधिगमित	२४	सेवां कुर्मश्चिरमिह	६
शम्भुः स्पृष्ट्वा शतदळ	७	सौवर्णीव द्रुतिमुपगता	१६
शेतामीशः पितृवन	२१	स्तोत्रप्रीतं तदनु	२४
शैलाधीशः शिव तव	१८	स्थूलं सूक्ष्मं परमिति	२३
शोकाविष्टः किमुत	५	स्विन्ना सद्यः शिरसि	३
श्रीकैलासप्रतिम	२६	हंहो वन्याद्विपवर	१२
श्लाघ्यासि त्वं शिवशिव	११	हव्यैर्गव्यैर्हुतवह	१९
संस्तम्भ्योद्यत्पुळक	२२	हस्तालम्बप्रणयिनि	२२
सख्योर्वक्त्रादिति	१७	होतुः शम्भोर्मयि	१०
सज्जीभूताः प्रतिगृह	२६		